**Indian Journal of Modern Research and Reviews**

**This Journal is a member of the *'Committee on Publication Ethics'***

**Online ISSN:** 2584-184X

***Review Article***

# The Importance of Teaching Methods and Strategies in Sanskrit Teacher Training

**संस्कृतशिक्षकप्रशिक्षणे शिक्षणविधीनां नीतीनाञ्च महत्त्वम्**

**Dr. Om Narayan Mishra**

***Article History***

- **ISSN**: 2584-184X
- **Received:** 24 Sep 2023
- **Accepted**: 10 Oct 2023
- **MRR:**1(1) Dec. 2023:10-14
- **©2023, All rights reserved**
- **Peer Review Process:** Yes
- **Plagiarism Checked**: Yes

***Authors Details***

Dr. Om Narayan Mishra
सहायकाचार्यः शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः पुरी, ओडिशा भारत

***Corresponding Author***

***Dr. Om Narayan Mishra**
सहायकाचार्यः शिक्षाशास्त्रविभागः, केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीसदाशिवपरिसरः पुरी, ओडिशा भारत

## Abstract

Educational technology, its components and approaches, soft technology, teaching strategies, methods and techniques, and various teaching methods such as lecture, demonstration, inquiry, project, inductive, deductive, and problem-solving methods play an important role in the teaching-learning process. There is a significant need for appropriate teaching methods and techniques in the educational process. The study concludes with relevant references.

Teaching is a process aimed at the holistic development of the student. Just as a potter shapes a pot from raw clay, the teacher contributes to the development and formation of both the internal and external personality of the student. For the development of students' academic as well as co-curricular competencies, the teacher employs a variety of teaching methods and techniques.

Along with classroom teaching, the teacher also manages informal and non-formal educational activities outside the classroom. It is well established that teaching takes place at three levels: the pre-active level, interactive level, and post-active level. The teacher plans and implements all these levels primarily for the welfare and development of the students.

At the pre-active level, the teacher determines what is to be taught, how it is to be taught, and what the objectives of teaching should be. Thus, effective planning at this stage provides the foundation for successful classroom interaction and meaningful learning outcomes.

**Keywords**: Teaching Training, Teaching Strategies, Prof. Armstrong, Sanskrit Teacher Training, Teaching Techniques

शैक्षिकतकनीकिः, शैक्षिकतकनीकेः अङ्गानि उपागममाश्च, कोमलतकनीकिः – शिक्षणनीतयः विधयः प्रविधयश्च, व्याख्यान-प्रदर्शन-अन्वेषण-प्रायोजना-आगमन-निगमन-समस्यासमाधानविधयः शिक्षणाधिगमप्रक्रियायां विधिप्रविधीनाम् आवश्यकता, निष्कर्षाः, सन्दर्भग्रन्थाः

छात्रस्य सर्वाङ्गीणविकासस्य एका प्रक्रिया वर्तते शिक्षणम्। छात्रस्य आन्तरिक-वाह्यस्वरूपस्य निर्माणं कुम्भकारसदृशं शिक्षकः करोति। शिक्षकः छात्राणां शैक्षणिकं तथा च सहशैक्षिकयोग्यतानां विकासाय वहुविधमाध्यमेन शिक्षणविधीनां प्रविधीनाञ्च प्रयोगं करोति। कक्षाशिक्षणेन सह कक्षातः वहिः अनौपचारिक-निरौपचारिकशिक्षणप्रवन्धनम् अध्यापकः करोति। ज्ञायते यत् शिक्षायाः स्तरत्रयाः सन्ति पूर्वक्रियात्मकस्तरः, अन्तःक्रियात्मकस्तरः उत्तरक्रियात्मकस्तरश्च। अध्यापकः एतेषां सर्वेषां स्तराणां विधानं छात्रकल्याणाय एव विदधाति । किं पाठनीयम् ? कथं पाठनीयञ्च ? तथा शिक्षणस्य उद्देश्यानि कानि भविष्यन्तीति ? निर्धारणं पूर्वक्रियात्मकस्तरेशिक्षकःकरोति ।

**कूटशब्दः** शिक्षणप्रशिक्षणदिशि, शिक्षणव्यूहाः, प्रो.आर्मस्ट्रांग, संस्कृतशिक्षकप्रशिक्षणे, शिक्षणयुक्तयः

## 1. प्रस्तावना:

यद्यपि तकनीकिप्रयोगः मानवाः प्राचीनकालादेव कुर्वन्तः सन्ति । न केवलं मानवाः अपि च केचन् जन्तवः पक्षिणश्च तकनीकिप्रयोगे सिद्धहस्ताः भवन्ति। परन्तु उभयोर्मध्ये भेद◌ः यत् मानवाः कस्यास्चित् तकनीकेः प्रयोगं कृत्वा तस्य तादृशमेव संरक्षणं कर्तुं समर्थाः भवन्ति तथा च जीवजन्तवः पक्षिणश्च तावदेव संरक्षणं नैव कुर्वन्ति। उदाहरणत्वेन मानवः सामान्यजीवनं तकनीक्या सह यापयन्ति ते सदैव किञ्चित् नूतनं कार्यं विदधन्ति येन तेषां योग्यतायां संवर्धनं भवति । औपचारिकशिक्षायाः अङ्गत्वेन तकनीकेः प्रयोगः प्राचीनकाले न भवति स्म यावदिदानिम् ।

## 2. शिक्षणतकनीकिः

शिक्षायां तकनीकेः प्रयोगेन शैक्षिकजगति क्रान्तिकपरिवर्तनमागतवान् । शिक्षायां तकनीकेः प्रयोगः यदा-कदा शिक्षकाः स्वगत्या कुर्वन्तः आसन् परन्तु न तु सर्वे शिक्षकाः तकनीकिप्रयोगे सिद्धहस्ताः आसन न तु सर्वे शिक्षायां तकनीकिप्रयोगं जानन्ति स्म। शैक्षिकतकनीकेः प्रथमप्रयोगः 1967 तमे वर्षे **आंग्लवासिनः ब्रायनमोर जोन्समहोदयाः** अकुर्वन् । अनन्तरं अस्य शब्दस्य व्याख्यानं परिस्थित्यानुगुणं वारं वारं सञ्जातम्। अधुना सर्वत्र शिक्षणम् अधिगमञ्च तकनीकिपूर्णं जायते। शिक्षायाः प्रत्येकं स्तरे शिक्षातकनीकेः व्यवहारं दृश्यते। लधुबालानां कृते तकनीकिपूर्णाः शिक्षणसामग्रयः तथैव यूनां कृते अत्याधुनातनशिक्षातकनीकेः प्रयोगः जायमानाः वर्तन्ते। अस्मिन् पर्याये ओह्योविश्वविद्यालयस्य प्राध्यापकाः **सिडनी एल. प्रेसीमहोदयेन** 1926 तमे वर्षे शिक्षणमशीन नाम्ना यन्त्रस्याविष्कारं प्रवर्तितम्। शिक्षायां तकनीकेः प्रवाहः इदानीं तीव्रधारायां परिवर्तितं जायते।

सन्दर्भेऽस्मिन् **जी.ओ.एम.लीथ**महोदयस्य विचारः वर्तते यत् , "शैक्षिकतकनीकिः शिक्षणप्रशिक्षणदिशि वैज्ञानिकज्ञानस्य प्रयोगः वर्तते येन शिक्षणप्रशिक्षणयोः प्रक्रियायाः काठिन्यं दूरीकृत्य तयोः प्रभावपूर्णत्वं दक्षताञ्च संवर्धते। (Educational Technology is the systematic application of scientific knowledge about teaching learning and conditions of learning to improve the efficiency of teaching and training.)"

तादृशमेव **मित्रा शिवकुमार**महोदयस्यचिन्तनं वर्तते यत्, " शिक्षणतकनीकिः शिक्षणपद्धतीनां शिक्षणप्रविधीनां तद्विज्ञानं वर्तते येन शैक्षिकोद्देश्यानां प्राप्तिः सरला भवति। (Education technology can be conceived as a science of techniques and methods by which educational goals could be realized.)"


सारांशत्वेन कथ्यते यत् शैशिकतकनीक्या शिक्षायां गुणात्मकं परिवर्तनम् आनयितुं शक्यते। तथैव तकनीक्या सह शिक्षणं तथा च तकनीक्या सह अधिगमः उभावपि प्रभावपूर्णा भवति ।

### ❖ शैक्षिकतकनीकेः अङ्गानि –

शिक्षणतकनीकेः भिन्न-भिन्नदृष्टिकोणेन आवश्यकतानुगुणं वा वर्गीकरणं कर्तुं शक्यते। वर्गीकरणस्य प्राधान्यं विधिः जायते उपागमाधारेणवर्गीकरणम्। शिक्षणप्रविधेः उपागमत्रयः सन्ति, यथा – कठोरोपागमः कोमलोपागमः प्रणालीविश्लेषणञ्च। एतेषु कोमलोपागमस्य प्रामुख्यम् अधिकं जायते । शिक्षण-प्रशिक्षणे गुणवत्तासम्वर्धनाय कोमलोपागमस्य भूमिका विशिष्ठा जायते । अस्य कोमलोपागमस्य बहून्यङ्गानि वर्तन्ते । तेषु प्रमुखास्सन्ति यथा-

1. शिक्षणनीतयः
2. शिक्षणविधयः
3. शिक्षणप्रविधयः
4. शिक्षणयुक्तयः।

एतेषां सर्वेषां पृथक-पृथक महत्त्वं वर्तते किञ्च एते सर्वे अन्तर्सम्बद्धाः सन्ति । एकस्य सिद्धान्तस्य प्रतिपादने अन्यस्यापि आवश्यकता परिकल्प्यते।शिक्षणनीतयः शिक्षणाधिगमप्रक्रियायाः रुपरेखां निर्माति। तद् रूपरेखानुगुणमेव शिक्षणविधयः शिक्षणप्रविधयः तथा च युक्तयः कार्यं कुर्वन्ति । अपरशब्देषु यादृशी शिक्षणनीतिः निर्मीयते तादृशी एव शिक्षणविधि-शिक्षणप्रविधि-युक्तिश्च व्यवह्रीयते शिक्षणसमये ।




**शिक्षणव्यूहाः/ शिक्षणनीतयः (Teaching Strategies)**

व्यूहस्य लौकिकार्थः जायते रणनीतिः । प्राचीनकाले सैन्ययुद्धस्य पूर्वयोजनानिर्माणं यथा राजानः कुर्वन्तः आसन् तादृशमेव अधुना शैक्षिकोद्देश्यानां प्राप्त्यर्थं शिक्षकाः योजनां निर्मान्ति । अर्थात् प्राचीनसमये युद्धस्य परिणामः यथा मुख्यः आसीत् तादृशरेव अधुना शिक्षणोद्देश्यानां प्राप्तिर्वा अधिगमस्य प्राप्तिः प्रमुखा जायते। सन्दर्भेऽस्मिन् केषाञ्चन विदुषां मतानि मुख्यानि वर्तन्ते यथा –

- ▶ शिक्षणव्यूहाः शिक्षणनीतयः वा शिक्षणस्य व्यापकविधयः सन्ति । (Strategies are broad method of teaching.) - **डेविस**
- ▶ शिक्षणव्यूहाः ताः योजनाः सन्ति यस्यां शिक्षणस्योद्देश्यानि, पाठ्यवस्तुः, छात्राणां व्यवहारपरिवर्तनं, कार्यविश्लेषणम्, अधिगमानुभः पृष्ठभूमिश्च निर्वचनीयाः भवन्ति। ( Teaching strategies are a generalized plan for a lesson which includes desired learner behavior in terms of goals, instructions and an outline of planned tactics necessary of implement strategy. ) – **स्ट्रेसर**

### शिक्षणव्यूहस्य वैशिष्ट्यानि –

- ❖ शिक्षणनीतयः (Teaching strategy) शिक्षणकार्यस्य कञ्चित् प्रतिमानं प्रति निर्दिशति ।
- ❖ शैक्षिकनीतयः शैक्षिकोद्देश्यानां प्राप्तये सहायिकाः भवन्ति ।

- ❖ शैक्षिकव्यूहाः(Teaching strategy) छात्राणां व्यवहारपरिवर्तनक्षेत्रे सहाय्यं कुर्वन्ति ।
- ❖ शैक्षिकनीतयः कार्यविश्लेषणे तथा च तस्य संरचनानिर्माणे सहाय्यं कुर्वन्ति । शिक्षणाधिगप्रक्रिया शिक्षणव्यूहेन व्यवहारपूर्णा भवति ।
- ❖ शैक्षिकनीतयः शिक्षकस्य कार्यनिष्ठां कौशलात्मकयोग्यतां च समेधयन्ति ।
- ❖ शिक्षणनीतौ शिक्षादर्शनं मनोविज्ञानं तथा च पुनर्बलनं-पृष्ठपोषणञ्च अन्तर्निहिताः भवन्ति ।
- ❖ शैक्षिकनीतयः शिक्षकस्य नियन्त्रणे कार्यं करोति अध्यापकः यदा इच्छति चेत् शिक्षणनीतौ परिवर्तनं कर्तुं शक्नोति ।

**शिक्षव्यूहस्य प्रकाराः**-यत्र शिक्षणोद्देश्यानां प्राधान्यं भवति चेत् तत्र शिक्षणे विशिष्टाध्यापनशैली शैक्षिकनीतिः नाम्ना प्रयुज्यते तथा च यत्र विषयवस्तुनः प्रस्तुतिमुरढीकृत्य विशिष्टशैली व्यवह्रीयते तत्र शिक्षणविधिः कथ्यते। उभयोः प्रयोगसंदर्भे भेदःकदाचित् शाब्दिकभेदः मात्र प्रतीयते। परन्तु संरचनात्मकदृष्ट्या उभयोः वृहद्भेदः जायते।

विषयस्य प्रस्तुतिकरणं व्याख्यानञ्च शैक्षिकोद्देश्यानां प्राप्तिः वहुविधमाध्यमेन सम्भवति ते सन्ति यथा – व्याख्याननीतिः, प्रदर्शननीतिः, प्रश्नोत्तरनीतिः, अन्वेषणनीतिः, निरीक्षित-अध्ययननीति, प्रयोजनानीतिः, समस्यासमाधाननीतिः, अनुवर्गनीतिः, पात्राभिनयम् अनुकरणशिक्षणनीतिश्च,शिक्षणस्य आगमन-निगमननीतिः, समूहशिक्षणनीतिः, अभिक्रमिताधिगमनीतिः, मस्तिष्कविप्लवनीतिः, ऐतिहासिकानुसन्धाननीतिश्च । इतोपि वहवः शिक्षणनीतयः सन्ति येषां योजनां अध्यापकः कक्षाशिक्षणसमये वा प्राक्कक्षाशिक्षणसमये करोति। एतेषु केचन् स्पष्टीकरणम् अधोप्रदत्तं वर्तते ।

**व्याख्यानम् (Lecturing Strategy) –**

शिक्षणस्य सर्वप्राचीनः नीतिरस्ति व्याख्यानम् । अध्यापकः कस्यचिद् अनुभूतविषयस्य व्याख्यानं कक्षायां छात्राणां पुरतः करोति। छात्राः निष्क्रियभावेन किञ्च ध्यानपूर्वकं विषयं श्रृणोति । अस्मिन् उपक्रमें अध्यापकः सामान्यसहायकसामग्रिणा व्याख्यानं प्रस्तोति । विधिरयं उच्चकक्षायाः कृते लाभकारी परन्तु निम्नकक्षायाः कृते महत्त्वपूर्णः न जायते। कक्षायाम् अध्यापकस्य बहुत्वं स्थापयति।

**वैशिष्ट्यानि –**

- ❖ शिक्षकेभ्यःशिक्षणस्य नीतिरियं सरल ा, संक्षिप्त ा,आकर्षिका भवति तथा च मुख्यविषयेन सह अतिरिक्तज्ञानमपि प्र ाप्नुवन्ति छात्राः।
- ❖ नीतावस्यां अल्पियसि समये अधिकां सूचनां दातुं शक्यते। तथा चैकस्मिन् समये अधिकाधिकच्छात्राः लाभान्विताः भवन्ति ।
- ❖ शिक्षणस्य नीतावस्यां अध्यापकः सक्रियो भवति परन्तु छात्राः निष्क्रियाः ।

**दोषाः –**

- ➢ शिक्षणनीतावस्यां छात्राः निष्क्रियाः भवन्ति, तथा च शिक्षणस्य सम्पूर्णोद्देश्यानां प्राप्तिः न भवति ।
- ➢ यदा-कदा अध्यापकः शिक्षणसमये विषयान्तरं प्रति आलोचनां करोति ।
- ➢ लघु बालकानां कृते पूर्णतया अनुपयोगीविधिरस्ति। व्याख्यानसमये प्रायशः छात्राःअत्यावश्यकविन्दूनां लेखनं नैव कर्तुं शक्नुवन्ति ।
- ➢ शिक्षणस्य व्यख्याननीतिःअमनोवैज्ञानिक ी नीतिः, जनतान्त्रिकशिक्षणपद्धतेः तिरस्कारः जायते अत्र ।

**प्रदर्शननीतिः(Demonstration) –**

स्थाईजन्यज्ञानस्य विकासाय प्रदर्शनविधिः सर्वोत्तमम्। विधावस्मिन् ज्ञानस्य सम्प्रत्ययीकरणं सापेक्षरूपेण अधिकं भवति यतोहि दृश्य-श्रव्यसाधनेन विषयस्य प्रस्तुतिः जायते अतएव विषयं प्रति छात्राणामवधानम् उत्कृष्टं भवति । शिक्षणे विषयेन सह वस्तुप्रदर्शनमपि भवति। छात्राः वस्तुं दृष्ट्वा आवश्यकप्रश्नमपि कर्तुं शक्नुवन्ति ।

**वैशिष्ट्यानि –**

- ❖ विधिरयं लघ्वाकारकक्षायाः कृते महदुपयोगी वर्तते ।
- ❖ अधिगमसमये छात्राः प्रश्नं कर्तुं शक्नुवन्ति तथा च अस्यां नीतौ विषयस्य चिरसम्प्रत्ययीकरणं जायते ।
- ❖ शिक्षणस्य नीतावस्यां मनोवैज्ञानिकसिद्धान्तेन सह गणतान्त्रिकशिक्षणप्रक्रियायाः पालनमपि भवति ।
- ❖ प्रदर्शननीतौ प्रायोगिकपद्धत्या छात्रेषु सृजनात्मिकाशक्तिः समेधते ।
- ❖ नीतावस्यां श्रम-शक्ति-समयस्यावश्यकता न्यूना भवति ।

**दोषाः –**

- ➢ शिक्षणस्य नीतावस्यां बालकाः न तु दक्षाः न च सर्वे छात्राः प्रदर्शनं ध्यानेन पश्यन्ति ।
- ➢ कदाचित् मौलिकविषयस्य प्रदर्शितविषयेण सह साम्यं न भवति यतोहि सर्वे प्रदर्शनविधौ दक्षाः न भवन्ति।
- ➢ सर्वेषां विषयाणां प्रदर्शनं तथा च तदनुगुणं विषयसामग्रेः सर्वत्रोपलब्धिः न भवति ।

**अन्वेषणनीतिः(Heuristic Strategy) –**

नीतिः इयं छात्राणां कृते वहूपयोगी वर्तते। अस्मिन् विधौ अध्यापकः पथप्रदर्शकत्वेन कार्यं करोति। छात्राणां त्रुटिपरिमार्जने सहाय्यं करोति। छात्राणां कार्याणि यथा अग्रेसरन्ति तथैव तेषाम् अन्वेषणशक्तावपि वृद्धिर्जायते। अस्य शिक्षणनीतेः जन्मदातृ वर्तते **प्रो.आर्मस्ट्रांग** अस्ति। तस्य मतं वर्तते यत् – कस्यचित् विषयस्याधिगमप्रक्रियैव अन्वेषणम्। छात्रैः विषयसम्बन्धितथ्यानां अन्वेषणं स्वयमेव करणीयम्। स्वानुभवेन अन्वेषणेन प्राप्तज्ञानं चिरस्थाई भवति। अस्य शिक्षणविधेः कानिचन वैशिष्ट्यानि निम्नलिखितानि सन्ति –

**वैशिष्ट्यानि –**

- ❖ छात्रेषु स्वात्मप्रेरकभावनायाः विकासो जायते । शिक्षणस्य नीतिरियं वैज्ञानिकसैद्धान्तेषु आश्रिता वर्तते ।
- ❖ नीतेः विधावस्मिन् छात्राः तथ्ययुक्तं तथा च सत्यानुग्राही भवन्ति ।
- ❖ सुसुप्तयोग्यतायाः जागरणं भवति शिक्षणनीतौ अस्मिन् । शिक्षणस्य अनया नीत्या छात्राणां चिन्तनयोग्यता सुविकसिता भवति ।

सर्वाणि कार्याणि कक्षायामेव समाप्तानि भवन्ति अतएव गृहकार्यस्यावश्यकता न भवति। छात्राणां सृजनात्मकशक्तौ आत्मनिर्भरतायाञ्च वृद्धि भवति ।

**दोषाः –**

- ➢ विधावस्मिन् उत्तमविद्यालयस्य तथा च प्रयोगशालायाः आवश्यकता भवति।
- ➢ लघु बालकानां कृते इयं शिक्षणनीतिः महत्त्वपूर्णा न भवति।

**प्रायोजनानीतिः(Project Strategy) –**

अस्य शिक्षणनीतेः आविष्कारः जानड्यूवीमहोदयस्य शिष्यः **किलपैट्रिकमहोदयेन** कृतः। तेषां मतानुसारेण प्रायोजना सा क्रिया वर्तते यस्यां छात्राः आत्मयोग्यतया स्वैच्छिकरूपेण सामाजिकवातावरणे लक्ष्यं प्राप्नुवन्ति । **स्टीवेन्सन**महोदयेनोक्तं यत् प्रायोजना एका समस्यापरकक्रिया वर्तते। यस्यां छात्राः स्वाभाविकपरिस्थितिषु समाधानम् अन्वेषयति। प्रायोजनानीतेः केचन् प्रमुखाः सिद्धान्ताः सन्ति, यथा -

**प्रायोजनायाः सिद्धान्ताः –**

- ❖ सोद्देश्यतासिद्धान्तः
- ❖ क्रियाशीलतायाः सिद्धान्तः
- ❖ वास्तविकतायाः सिद्धान्तः
- ❖ उपयोगितायाः सिद्धान्तः
- ❖ स्वतन्त्रतायाः सिद्धान्तः तथा च सामाजिकतायाः सिद्धान्तः

प्रायोजना निर्माण समये एते सिद्धान्ताः अनुकरणीयाः । एते सर्वे सिद्धान्ताः प्रायोजनानीतेः पथं परिणामञ्च सुकरं सुगम्यञ्च निर्मान्ति।

**प्रायोजनायाः पदानि –**

- **प्रायोजनायाः चयनम्** – कस्य विषयस्य प्रायोजना अस्ति तदनुगुणं प्रायोजना चयनीया।
- **रूपरेखायाः निर्माण्** – प्रायोजनायाः विषयं सङ्कल्य तस्याः क्रियात्मकरूपरेखा निर्मातव्या।
- **कार्यक्रमस्य क्रियान्वयनम्** – यादृशी प्राक्योजना निर्मिता वर्तते तादृशी क्रिया सम्पाद्यते।
- **मूल्याङ्कनम्** – प्रायोजनायाः निष्कर्षः अवधेयः । मूल्याङ्कनेन प्रायोजनायाः साफल्यमासाफल्यं स्पष्टं भवति।

**प्रायोजनायाः प्रकाराः –**

- ✓ निर्माणसम्बन्धिप्रायोजना
- ✓ निरीक्षणसम्बन्धिप्रायोजना
- ✓ उपभोक्ताप्रायोजना
- ✓ संग्रहसम्बन्धिप्रायोजना
- ✓ शल्यकार्यसम्बन्धिप्रायोजना
- ✓ समस्यात्मकप्रायोजना

**वैशिष्ट्यानि –**

- ❖ अनया शिक्षणनीत्या छात्राणां चिन्तनशक्तिः सम्वर्धिता जायते।
- ❖ छात्राः सम्पूर्णयोजनाकाले गतियुक्ताः भवन्ति।
- ❖ छात्रेषु आत्मशक्तिः, धैर्यः, सन्तोषभावश्च आगच्छति, अयं एकः मनोवैज्ञानिकविधिरस्ति।
- ❖ शिक्षणनीतावस्यां प्राप्तज्ञानं चिरस्थाई भवति।

**दोषाः -**

- ➢ शिक्षणस्य दीर्घकालिकी प्रक्रिया जायते।
- ➢ अस्यां शिक्षणनीतौ शिक्षकस्य कार्यभारः सापेक्षिकरूपेण अधिको वर्तते।
- ➢ अदक्षाध्यापकानां कृते कष्टप्रदो भवति।
- ➢ अनया शिक्षणनीत्या सम्पूर्णपाठ्यक्रमस्याध्यापनं नैव कर्तुं शक्यते।

**समस्यासमाधाननीतिः(Problem solving Strategy) –**

समस्यासमाधानविधिः एकः प्रयोजनवादीविधिरस्ति। अर्थात् प्रयोजनवादीदर्शनस्य यदा आरम्भः अभवत् तदुपरान्ते अस्य सिद्धान्तस्य प्रचलनं जातम्। प्रत्येकः छात्रः स्वशैक्षिकसमस्यां कक्षायाः पुरतः प्रदर्शयति। सर्वेषां छात्राणां समस्यामाहत्य औसतसमस्यानां चयनं क्रियते तथा च तेषामौसत्समस्यानां पुनर्वितरणं छात्रेषु क्रियते। छात्रसमूहः तेषां समस्यानां समाधानं प्रस्तुवन्ति यस्मिन् समस्यासमाधाने शिक्षकः सहाय्यं करोति। अस्य विधेः निम्नलिखितानि सोपानानि सन्ति, यथा –

- समस्यायाः चयनं तदनु प्रस्तुतीकरणम्
- तथ्यानां एकत्रीकरणम्
- परिकल्पनायाः निर्माणं तदनु विश्लेषणम्।
- मूल्याङ्कनं निष्कर्षलेखनञ्च।

**वैशिष्ट्यानि –**

- ❖ छात्राः स्वसमस्यायाः समाधानं स्वयमेव प्राप्नुवन्ति।
- ❖ छात्रेषु निरीक्षणतर्कयोः योग्यता विकसति।
- ❖ छात्रेषु समावेशात्मकभावस्य विकासो जायते। सर्वे छात्राः मिलित्वा कार्यं कुर्वन्ति।
- ❖ छात्राः सम्भाव्यसमाधानां सामान्यीकरणं कृत्वा समाधानं प्राप्नुवन्ति।

**दोषाः –**


- ➢ समय-श्रमसाध्योऽयं विधिः।
- ➢ अस्य विधेः साफल्यं योग्याध्यापकस्य नेतृत्वे एव सम्भवति।
- ➢ प्रथमिककक्षायां विधिरयं अनुपयोगी।

**शिक्षणस्य आगमन-निगमननीतिः (Inductive & Deductive Strategy) –**

आगमन-निगमनविधिः सर्वेषां स्तराणां कृते समानरूपेण उपयोगी वर्तते। प्रारम्भिककक्षायां यत्र शिक्षकः उदाहरणं स्रावयित्वा सिद्धान्तस्य प्रतिपादनं क्रियते तत्रैव प्रौढच्छात्राणां कृते सूत्रस्य व्याख्यानं कृत्वा उदाहरणेन विषयस्य प्रत्ययीकरणं करोति।

**आगमनविधिः -**

आगमनविधिः प्राथमिककक्षायाः कृते सर्वाधिकोपयोगी विधिरस्ति। विविधानां विशिष्टनिष्कर्षाणां तर्काणां सामान्यीकरणेन यः निष्कर्षः प्राप्यते तद् दु सामान्यम्। तथा च सामान्यान्वेषणस्य विधिरयं आगमनविधिः




**आगमनविधेः वैशिष्ट्यानि –**

- प्राथमिककक्षायाः छात्राणां कृते महत्त्वपूर्णं वर्तते विधिरयम्।
- उदाहरणात् सूत्रं प्रति गमनं भवति।
- अस्यां शिक्षणनीतौ विषयस्य प्रवाहः विशिष्टात् सामान्यं प्रति भवति।
- शिक्षणस्य विधावस्मिन् छात्राः मुख्यरूपेण सक्रियाः भवन्ति।
- छात्राः स्वयं समाधानं प्राप्नुवन्ति अतएव तेषाम् आत्मविश्वासः वर्धते।


**दोषाः-**

- उच्चकक्षायाः कृते अनुपयोगी सिद्धान्तोऽयम् यतोहि शिक्षणस्य गतिः अत्यन्तं शिथिलं भवति।
- शिक्षकाणां कृते विधिरयं निरसः।

**निगमनविधिः** -निगमनविधौ सामान्यस्य सरलीकरणं जायते। अर्थात् सामान्यसिद्धान्तस्या सरलीकरणं कृत्वा तस्य सिद्धान्तस्य निर्बन्धनं तत्परं बोधगम्य उदाहरणेन तस्य सत्यापनमेव निगमनविधिः।

**निगमनविधेः वैशिष्ट्यानि –**

- उच्चस्तरीयच्छात्राणां कृते महत्त्वपूर्णं जायते यतोहि तेषां छात्राणां बुद्धिः प्रौढा भवति।
- शिक्षणस्य विधावस्मिन् सूत्रात् उदाहरणं प्रति गमनं भवति।
- अस्यां शिक्षणनीतौ अध्यापकः मुख्यरूपेण सक्रियः भवति।
- छात्राः समाधानं स्वयं नैव प्राप्नु शक्नुवन्ति अतएव छात्राणां कृते विधिरयं निरसः।




**दोषाः**- शिक्षणनीतावस्यां केचन् दोषाः सन्ति। ते सन्ति यथा –

- निम्नकक्षायाः कृते अनुपयोगी विधिः जायते यतोहि शिक्षणनीतावस्यांछात्राणाम् अधिगमः क्षीणः जायते।
- छात्राः सदैव संशययुक्ताः भवन्ति यत् सूत्रस्य समाधानं भविष्यति न वा।

## 3. निष्कर्षाः –

शिक्षायाः प्रमुखोद्देश्यं भवति छात्राणां सर्वाङ्गीणविकासः। छात्राणां सर्वाङ्गीणविकासाय शिक्षकाः सर्वदा प्रयासरताः भवन्ति। कक्षायां गमनात् पूर्वमेव कथं पाठनीयमित्यस्य निर्धारणं करोति। कक्षां प्राप्त्यनन्तरमपि यदा पूर्वकल्पितशिक्षणनीत्या छात्राणाम् अधिगमः न भवति तर्हि शिक्षणनीतौ आकस्मिकपरिवर्तनं कृत्वा नूतनशिक्षणविधिना प्रविधिना युक्त्या च अध्यापकः पाठयति। वैयक्तिकभिन्नतां दृष्ट्वा अध्यापकः कक्षायां भिन्नं-भिन्नं शिक्षणनीतिम् अकारयति।

## 4. संदर्भग्रन्थाः –

1. **कुलश्रेष्ठ एस.पी. शैक्षिकतकनीकि के मूल आधार. आर. लाल पब्लिकेशन, मेरठ–c2020.**
2. **कुलश्रेष्ठ एस.पी. एवं कुलश्रेष्ठ ए. के. शैक्षिकतकनीकि के मूल आधार. आर लाल पब्लिकेशन, मेरठ. c2019.**
3. **मंगल, एस. के एवं मंगल, उमा, शिक्षा तकनीकि (हिन्दी अनुवाद).** Prentice Hall India Learning Private Limited. c2009
4. **शर्मा, आर. ए. अनुदेशनतकनीकि के मूलभूत आवश्यकताएँ,** 2nd Ed.**, आर लाल पब्लिकेशन, मेरठ. c2018**
5. Radha Mohan.Teacher Education. PHI Learning, Pvt. Limited 2nd Edition c2019.
6. Mishra Sandhya (Vatsa). Educational Technology and Management. R. Lal Publication, Meerut. c2019
7. Saxena, N. R. Essential & Educational Technology Management, R. Lal Pub. 2nd Ed. 2018

**Creative Commons License**
This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) License. This license permits users to copy and redistribute the material in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and the source. No modifications, adaptations, or derivative works are permitted.